K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ व्याधिमन्त्रः —

वीरभद्र ऋषिः । अनुष्टुप् छन्दः । शिवो देवता । व्यां बीजम् । हुं शक्तिः । व्यामित्यादिना करन्यासः । तेनैव षडङ्गं च ॥ ध्यानम् —

त्रिपादं त्रिभुजं भीमं त्रिमूर्धानं त्रिलोचनम् ।
त्रिशूलाहिकपालाढ्यं ज्वालास्यं वक्रदंष्ट्रकम् ॥
सप्तशृङ्गं* वसामालं श्वचर्माम्बरधारिणम् ।
अशेषाङ्गव्रणोद्भूतक्रिमिजालसमाकुलम् ॥
वक्रनासं बृहत्स्कन्धं क्षुधया पीडितोदरम् ।
वैरिणां देहमालिङ्ग्य भक्षयन्तं विकीर्णकम् ॥
कलायकुसुमानीलं महाव्याधिकरं शिवम् ।
चिरं ध्यात्वा जपेन्मन्त्रं सहस्रं रिपुदिङ्मुखः ॥

ओं नमो भगवते रुद्राय महाव्याधिकराय देवदत्तं पीडय हुंफट् स्वाहा इति मन्त्रः ॥

तिर्यगूर्ध्वचतुर्दशरेखा मध्यतो विलिखेदथ मन्त्रम् ।
बाह्यशूलतदग्रकसाध्यं रोगचक्रमिदं रिपुनाशम् ॥
यन्त्रमालिख्य सीसे वा साध्यवृक्षेऽथवाम्बिके ।
आराध्य चाष्टचूर्णेन लिप्त्वा जप्त्वा खनेन्निशि ॥
श्मशाने बलिपूर्वं तु पुनस्स्नात्वा जपेत्तथा ।
जपमेवं त्र्यहं कुर्याच्छत्रूणां रोगवृद्धये ।
अहेतुकं महारोगं रिपुस्संप्राप्य नश्यति ॥
यत्साध्यं लिखितं व्याधेस्तत्तद्व्याधिर्भविष्यति ।
तद्रोगं रिपुराश्रित्य सुभगे मा भवेद्ध्रुवम् ॥

अयमर्थः — तिर्यगूर्ध्वं चतुर्दशरेखा विलिख्य, सर्वतो मध्यकोष्ठे मन्त्रं विलिख्य, रेखाग्रेषु शूलानि विलिखेत् ॥

---

* वसायाः मालाकारत्वमनुपपन्नम् । अतः वसायुक्त आन्त्रादिमालायुक्तमिति वा भावो बोध्यः ।